# Gangastavah 3

# ગઙ્ગાસ્તવઃ ૩

## Document Information

Text title : Gangastavah 3

File name : gangAstavaH3.itx

Category : devii, devI, nadI

Location : doc_devii

Author : DaraphaKhaM

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Proofread by : Anil Kumar Pandey anil.kumar17pandey at gmail.com

Description/comments : Ganga Jnana Mahodadhi compiled by Acharya Ramapada Chakravarty

Latest update : December 7, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 7, 2019

*sanskritdocuments.org*

# Gangastavah 3

## ગઙ્ગાસ્તવઃ ૩

શ્રીગણેશાય નમઃ ।

શાર્દૂલવિક્રીડિતં છન્દઃ

યત્ત્યક્તં જનનીગણૈર્યદપિ ન સ્પૃષ્ટં સુહૃદ્બાન્ધવૈ
યસ્મિન્ પાન્થદૃગન્તસન્નિપતિતે તૈઃ સ્મર્યતે શ્રીહરિઃ ।
સ્વાઙ્કે ન્યસ્તતદીદૃશં વપુરહો સ્વીકુર્વતી પૌરુષં
ત્વં તાવત્ કરુણાપરાયણપરા માતાઽસિ ભાગીરથિ ? ॥ ૧॥

આર્યાછન્દ

અચ્યુતચરણતરઙ્ગિણિ શશિશેખરમૌલિમાલતીમાલે ।
ત્વયિ તનુવિતરણસમયે દેયા હરતા ન મે હરિતા ॥ ૨॥

મન્દાક્રાન્તા

શૂન્યીભૂતા શમનનગરી નીરવા રૌરવાદ્યા
યાતાયાતૈઃ પ્રતિદિનમહો ભિદ્યમાના વિમાનાઃ ।
સિદ્ધૈઃ સાર્દ્ધં દિવિ દિવિષદઃ સાર્ઘ્યપાત્રૈકહસ્તા
માતર્ગઙ્ગે! યદવધિ તવ પ્રાદુરાસીત્ પ્રવાહઃ ॥ ૩॥

ઉપજાતિઃ

પયો હિ ગાઙ્ગં ત્યજતામિહાઙ્ગ પુનર્ન ચાઙ્ગં યદિ યાન્તિ ચાઙ્ગમ્ ।
કરે ગ્થાઙ્ગ શયને ભુજઙ્ગ યાને વિહઙ્ગ ચરણે ચ ગાઙ્ગમ્ ॥ ૪॥

શાર્દૂલવિક્રીડિતં

કલ્મક્ષૌણિકરોટયઃ કતિ કતિ દ્વીપિદ્વિપાનાં ત્વચઃ
કાકોલાઃ કતિ પન્નગાઃ કતિ સધાધામ્નશ્ચ ખણ્ડાઃ કતિ ।
કિઞ્ચ ત્વઞ્ચ કતિ ત્રિલોકજનનિ ! ત્વદ્વારિપૂરોદરે
મજ્જજ્જન્તુકદમ્બકં સમુદયત્યેકૈકપાદાય યત્ ॥ ૫॥

શિખરિણી

કુતોઽવીચિર્વીચિસ્તવ યદિ ગતા લોચનપથં

    ત્વમાપીતા પીતામ્બરપુરનિવાસં વિતરસિ ।
ત્વદુત્સઙ્ગે ગઙ્ગે ! યદિ પતતિ કાયસ્તનુભૃતાં
    તદા માતઃ ! શાતક્રતવપદલાભોઽપ્યતિલઘુઃ ॥ ૬॥

ત્વમમ્ભો લોકાનામખિલદુરિતાન્યેવ દહસિ
    પ્રગન્ત્રી નિમ્નાનામપિ નયસિ સર્વોપરિ નતાન્ ।
સ્વયં જાતા વિષ્ણોર્જનયસિ મુરારાતિનિવહાન્
    અહો માતર્ગઙ્ગે ! કિમિહ ચરિતં તે વિજયતે ॥ ૭॥

માલિનીછન્દઃ
સુરધુનિ ! મુનિકન્યે ! તારયેઃ પુણ્યવન્તં
    સ તરતિ નિજપુણ્યૈસ્તત્ર કિન્તે મહત્ત્વમ્ ।
યદિ ચ ગતિવિહીનં તારયેઃ પાપિનં માં
    તદિહ તવ મહત્ત્વં તન્મહત્ત્વં મહત્ત્વમ્ ॥ ૮॥

(રચનાકાલ ઃ ૧૬૧૯ ઈ૦ રઙ્ગૂન સ્વસમુદ્ર, પૃ૦ ૧૭૬
રચનાસ્થલં- દક્ષિણેવરભાગોરચિતટઃ ।)

ઇતિ દરાફખાંવિરચિતઃ ગઙ્ગાસ્તવઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Gangastavah 3*

pdf was typeset on December 7, 2019

Please send corrections to *sanskrit@cheerful.com*